[RV S 10-127 (Kāñchī Pāṭhaḥa)]

ॐ रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः ।
विश्वा , अधि श्रियोऽधित ॥ १ ॥

ॐ rāt’rīv’ vyakh’yadāyatī pu-rut’rā dēv’yaaa ,
ak’ṣhabhi-ḥi ।
viśh’vā , adhiśh’ śhriyōō (a)dhita ॥ 1 ॥

ओर्वप्रा , अमर्त्या निवतो देव्यु१द्वतः । ज्योतिषा बाधते तमः ॥ २ ॥

ōr’vap’rā , amar’tyā nivatōō dēv’yuuu , ud’vata-ḥa ।
jyōti-ṣhā bādhatē tama-ḥa ॥ 2 ॥

निरु स्वसारमस्कृतोषसं देव्यायती । अपेदु हासते तमः ॥ ३ ॥

nirus’ svasāāramas’kṛtōṣhasan’n’ dēv’yāāyatī ।
apēdu- hāsatē tama-ḥa ॥ 3 ॥

सा नो , अद्य यस्या वयं नि ते यामन्नविक्ष्महि । वृक्षे न वसतिं वयः ॥ ४ ॥

sā nōō , ad’ya yas’yāā vayan’ ni tē
yāman’navik’ṣhmahi ।
vṛk’ṣhē na va-satiṁ’ vaya-ḥa ॥ 4 ॥

नि ग्रामासो , अविक्षत नि पद्वन्तो नि पक्षिणः ।
नि श्येनासश्चिदर्थिनः ॥ ५ ॥

nig’ grāmāāsō ,
avik’ṣhata ni pad’van’tō ni pak’ṣhiṇa-ḥa ।
niśh’ śhyēnāsaśh’chidar’thina-ḥa ॥ 5 ॥

www.Sai Veda .net

यावयाँ वृक्यंॅ वृकं यवयं स्तेनमूॅर्म्ये । अथाँ नः सुतराँ भव ॥ ६ ॥

yāvayāā vṛk'yaaa ,

amِ'vṛkañ'ñ' yavayas' stēnamūūr'myē ।

athāā nas' sutarāā bhava ॥ 6 ॥

उप मा पेपिशत् तमः कृष्णं व्यक्तमस्थित । उष , ऋणेव यातय ॥ ७ ॥

upa- mā pēpi-śhat'tama[hk]' kṛṣh'ṇaṁ'

vyak'tamas'thita ।

uṣha- , ṛṇēva- yātaya ॥ 7 ॥

उप ते गा , इवाकरं वृणीष्व दुहितर्दिवः । रात्रि स्तोमं न जिग्युषे ॥ ८ ॥

upa- tē gā , ivāka-raṁ' vṛṇīṣh'va du-hitar'divaḥa ।

rāt'ris' stōman' na jig'yuṣhēē ॥ 8 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.SaiVeda.net

[RV S 1-127 (Śhṛṅgērī Pāṭhaḥa)]

ॐ रात्री व्यंख्यदायती पुंरुत्रा देव्य१ंक्षभिंः ।
विश्वा , अधि श्रियोंऽधित ॥ १ ॥

ॐ rāt'rīv' vyakh'yadāyatī purut'rā dēv'yaaa ,
ak'ṣhabhi-ḥi |
viśh'vā , adhiśh' śhriyōō (a)dhita || 1 ||

ओर्वंप्रा , अमंर्त्या निवतों देव्यु१ंद्वतंः । ज्योतिंषा बाधते तमंः ॥ २ ॥
ōr'vap'rā , amar'tyā nivatōō dēv'yuuu , ud'vata-ḥa |
jyōtiṣhā bādhatē tama-ḥa || 2 ||

निरु स्वसांरमस्कृतोषसं देव्यांयती । अपेदुं हासते तमंः ॥ ३ ॥
nirus' svasāāramas'kṛtōṣhasan'n' dēv'yāāyatī |
apēdu hāsatē tama-ḥa || 3 ||

सा नों , अद्य यस्यां वयं नि ते यामन्नविंक्ष्महि । वृक्षे न वंसतिं वयंः ॥ ४ ॥
sā nōō , ad'ya yas'yāā vayan' ni tē
yāman'navik'ṣhmahi |
vṛk'ṣhē na vasatiṁ' vaya-ḥa || 4 ||

नि ग्रामांसो , अविक्षत नि पद्वन्तो नि पक्षिणंः ।
नि श्येनासंश्चिदर्थिनंः ॥ ५ ॥
nig' grāmāāsō ,
avik'ṣhata ni pad'van'tō ni pak'ṣhiṇa-ḥa |
niśh' śhyēnāsaśh'chidar'thina-ḥa || 5 ||

www.Sai Veda net

या॒वया᳚ वृ॒क्यं॑१॒ वृकं᳚ य॒वय॑ स्ते॒नमू᳚र्म्ये । अथा᳚ नः सु॒तरा᳚ भव ॥ ६ ॥

yāvayāā vṛk’yaaa ,

am̐’vṛkañ’ñ’ yavayas’ stēnamūūr’myē ।

athāā nas’ sutarāā bhava ॥ 6 ॥

उप॑ मा॒ पेपि॑श॒त् तम॑ः कृ॒ष्णं व्य॑क्तमस्थित । उष॑ , ऋ॒णेव॑ यातय ॥ ७ ॥

upa mā pēpiśhat’tama[hk]’ kṛṣh’ṇam̐’

vyak’tamas’thita ।

uṣha , ṛṇēva yātaya ॥ 7 ॥

उप॑ ते॒ गा , इ॒वाक॑रं वृणी॒ष्व दु॑हितर्दिवः । रात्रि॒ स्तोमं॒ न जि॒ग्युषे᳚ ॥ ८ ॥

upa tē gā , ivākaram̐’ vṛṇīṣh’va duhitar’divaḥa ।

rāt’ris’ stōman’ na jig’yuṣhēē ॥ 8 ॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.SaiVeda.net